# Shri Sharada Devi Stotram

# શ્રીશારદાદેવીસ્તોત્રમ્

## Document Information

Text title : Shri Sharada Devi Stotram

File name : shAradAdevIstotram4.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Swami Balaramanandena

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીશારદાદેવીસ્તોત્રમ્

રામકૃષ્ણસ્ય યા શક્તિર્ભિન્નરૂપેણ રૂપિતા ।
નમામિ બ્રહ્મશક્તિં તાં, શારદાં પરમેશ્વરીમ્ ॥ ૧॥

માતા બ્રહ્મમયી પૂજ્યા, હ્યુદ્બોધન નિવાસિની ।
નમામિ વૈષ્ણવીં માયાં, શારદાં પરમેશ્વરીમ્ ॥ ૨॥

નારીરૂપં સમાશ્રિત્ય, છદ્મરૂપેણ યા સ્થિતા ।
પ્રણમામ્યાદિશક્તિં તાં; શારદાં પરમેશ્વરીમ્ ॥ ૩॥

પરમા પ્રકૃતિર્નિત્યા, માયા ચ ત્રિગુણાત્મિકા ।
સગુણ નિર્ગુણા ચૈવ, શારદા પરમેશ્વરી ॥ ૪॥

સર્ગસ્થિતિલયાદીનાં, લીલાશક્તિઃ સનાતની ।
આવિર્ભૂતા જગત્રાતું, શારદા પરમેશ્વરી ॥ ૫॥

સીતા-રાધાદિરૂપૈશ્ચ; યાऽવતીર્ણા યુગે યુગે ।
નમામિ યોગમાયાં તાં, શારદાં પરમેશ્વરીમ્ ॥ ૬॥

કાલીદુર્ગાદિરૂપૈશ્ચ, યા શક્તિરર્ચિતા જનૈઃ ।
પ્રણમામ્યાદિશક્તિં તાં, શારદાં પરમેશ્વરીમ્ ॥ ૭॥

ઉમા-દેવાત્મશક્ત્યાદિ, નામ્ના વેદેષુ વર્ણિતા ।
પ્રણમામ્યાદિમાયાં તાં, શારદાં પરમેશ્વરીમ્ ॥ ૮॥

તુરીયે ન કદા દૃષ્ટા, શુષ્કકાષ્ઠેऽનલો યથા ।
નમામિ બ્રહ્મશક્તિં તાં, શારદાં પરમેશ્વરીમ્ ॥ ૯॥

યયા ચ ભ્રામ્યતે જીવો, બ્રહ્મચક્રે પુનઃ પુનઃ ।
નમામિ વૈષ્ણવીં માયાં, શારદાં પરમેશ્વરીમ્ ॥ ૧૦॥

યા શક્તિર્ગુરુરૂપેણ, ત્રાયતે ભવબન્ધનાત્ ।
નમામિ ગુણશક્તિં તાં, શારદાં પરમેશ્વરીમ્ ॥ ૧૧॥

રામકૃષ્ણઃ પરબ્રહ્મ, તચ્છક્તિઃ શારદા તથા ।
એકસ્ય દ્વિવિધે રૂપે, ઉભૌ તૌ પ્રણમામ્યહમ્ ॥ ૧૨॥

ઇતિ સ્વામિબલરામાનન્દેનવિરચિતં "શ્રીશ્રીશારદાદેવીસ્તોત્રમ્" સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

---

*Shri Sharada Devi Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*